10-12-2020

साहित्यम् । शास्त्री

## छन्दोऽलङ्कारनिर्णयः ।

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
। ऽऽ।।ऽऽऽ । ऽ।।।ऽ।ऽ

तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥
।ऽऽऽ।ऽ ऽऽ।।ऽऽ। ऽ।ऽ

एतत् पद्यं वर्णसमवृत्तं न तु मात्रिक छन्दः । पद्यस्य प्रत्येके पादे अष्टाक्षराः सन्ति । यगणादिक्रमः अनिश्चितः किन्तु समचरणयोः चतुर्थवर्णपश्चात् जगणस्य प्रयोगः अस्ति । अतएव अनुष्टुप् (श्लोकः) जात्याः **पथ्यावक्त्र छन्दः** अथवा **श्लोकछन्दः** ।

श्लोकस्य लक्षणमस्ति →

"श्लोके षष्ठं गुरुज्ञेयं सर्वत्र लघुपञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥"

प्रदत्ते श्लोके सर्वेषु चरणेषु षष्ठवर्णः गुरुः अस्ति। सर्वत्र पञ्चमवर्णः ह्रस्व (लघुः) अस्ति । द्विचतुष्पादयोः सप्तमं वर्णः ह्रस्वः अन्यत्र दीर्घः अस्ति ।

अलङ्कारः → "**निदर्शना**" ।

लक्षणम् → "निदर्शना । अभवन् वस्तुसम्बन्ध उपमापरिकल्पकः।"

(signature) 10-12-2020

डॉ० निर्मलकुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

संस्कृतसामान्यम् । उपशास्त्री I
अनिवार्यप्रथमपत्रम् । तत्पुरुषः समासः

"तत्पुरुषः ।" "द्विगुश्च ।" → द्विगुरपि तत्पुरुषसंज्ञः स्यात् ।
अधिकारोऽयम् प्राग्बहुव्रीहेः ।

रूपसिद्धिः → पञ्चराजम्

लौकिकविग्रहः → पञ्चानां राज्ञां समाहारः ।
अलौकिकविग्रहः → पञ्चन् आम् राजन् आम् ।
अत्र "तद्धितार्थोत्तरपदसमाहारे च" सूत्रेण समाहारवाच्ये संख्यावाची 'पञ्चन्' शब्दस्य 'राजन्' शब्देन सह समासः ।
'द्विगुश्च' सूत्रेण तत्पुरुषःसंज्ञा । 'कृत्तद्धितसमासाश्च' सूत्रेण प्रातिपदिक संज्ञा । 'सुपो धातुप्रातिपदिकयोः' सूत्रेण 'सुप्' लोपः । पञ्चन् राजन् । 'नलोपः प्रातिपदिकान्तस्य' → पञ्च राजन् 'राजाहःसखिभ्यष्टच्' सूत्रेण समासान्त टच् (अ) प्रत्ययः → पञ्च राजन् टच् (अ) । 'नस्तद्धिते' सूत्रेण 'राजन्' इत्यस्य अन् लोपः → पञ्च राज् टच् (अ) । टच् इत्यस्य 'चुटू' सूत्रेण अनुबन्ध लोपः → पञ्च राज् अ । 'एकदेशविकृतमनन्यवत्' न्यायेन पुनः प्रातिपदिक संज्ञा । 'स्वौजसमौट्०' सूत्रेण सु प्रत्ययः पञ्च राज सु । 'स नपुंसकम्' । 'अतोऽम्' सूत्रेण अमादेशः - पञ्च राज सु > अम् । 'अमि पूर्वः' सूत्रेण 'अम्' इत्यस्य अस्य पूर्वरूपः → <u>पञ्चराजम्</u> । रूपं सिद्धम् ।

10-12-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णिया
का० सि० द० सं० विश्ववि० दरभङ्गा ।

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् ।

## धातु रूपाणि

√कृ - (करना), उभयपदी , परस्मैपदरूपम् ।

| लकार - पुरुष | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| लट् | प्र० पु० | करोति | कुरुतः | कुर्वन्ति |
| | म० पु० | करोषि | कुरुथः | कुरुथ |
| | उ० पु० | करोमि | कुर्वः | कुर्मः |
| लोट् | प्र० पु० | करोतु | कुरुताम् | कुर्वन्तु |
| | म० पु० | कुरु | कुरुतम् | कुरुत |
| | उ० पु० | करवाणि | करवाव | करवाम |
| लङ् | प्र० पु० | अकरोत् | अकुरुताम् | अकुर्वन् |
| | म० पु० | अकरोः | अकुरुतम् | अकुरुत |
| | उ० पु० | अकुर्वम् | अकुर्व | अकुर्म |
| विधिलिङ्गम् | प्र० पु० | कुर्यात् | कुर्याताम् | कुर्युः |
| | म० पु० | कुर्याः | कुर्यातम् | कुर्यात |
| | उ० पु० | कुर्याम् | कुर्याव | कुर्याम |
| लृट् | प्र० पु० | करिष्यति | करिष्यतः | करिष्यन्ति |
| | म० पु० | करिष्यसि | करिष्यथः | करिष्यथ |
| | उ० पु० | करिष्यामि | करिष्यावः | करिष्यामः |

10-12-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ